“विद्वांस्तस्य विद्यते” न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते” इत्याद्याः श्रुतयश्चात्र प्रमाणम्।

**विद्ध** त्रि० व्यध-क्त। १छिद्रिते अमरः। २क्षिप्ते ३सदृशे ४बाधिते मेदि० ५ताड़िते च।

**विद्धकर्णा** स्त्री० विद्धः कर्ण इव पत्रमस्याः। पाठायाम् (आकनादि) द्विरूपकोषः। स्त्रीत्वमपि तत्रैव अमरः। ङीप्। स्वार्थे क। तत्रार्थे स्त्री शब्दर०। [पदार्थे त्रि०।

**विद्यमान** पु० विद-शानच्। १वर्त्तमानकाले, २तद्युक्ते

**विद्या** स्त्री विद-क्यप्। १ज्ञाने। २तत्त्वसाक्षात्कारे “विद्यया मृतमश्नुते” इति श्रुतिः। ३दुर्गायां शब्दच० ४गणिकारिकावृक्षे शब्दच० तन्त्रोक्ते ५देवीमन्त्रे च। “शतलक्षप्रजप्तापि तस्य विद्या न सिध्यतीति” श्यामास्तवः। ६विद्याहेतौ शास्त्रे “अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः” प्रा० त० विष्णुपु०। विद्याभेदे देवताभेदाः हेमा० व्र० विष्णुधर्मोत्तरे उक्ता यथा “ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्वेदस्तु वासवः। सामवेदं तथा विष्णुः रुद्रश्चाथर्वणो भवेत्। शिक्षा प्रजापतिर्ज्ञेया कल्पो ब्रह्मा प्रकीर्त्तितः। सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः। छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः। मीमांसा भगवान् सोमो न्यायमार्गः समीरणः। धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः। इतिहासं प्रजाध्यक्षो धनुर्वेदः शतक्रतुः। आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः। कलावेदो महादेवी नृत्यशास्त्रं महेश्वरः। सङ्कर्षणः पञ्चरात्रं रुद्रः पाशुपतं तथा। पातञ्जलमनन्तश्च सांख्यञ्च कपिलो मुनिः। अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्त्तितः। कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः। अन्यानि यानि शास्त्राणि यत्कर्माणि प्रचक्षते। स एव देवता तस्य शास्त्रं कर्म च दैववत्”। श्रुतौ तु विद्याभेदः द्विविधः पराऽपराभेदात् उक्तः। यया ब्रह्मावगमः सा परा “यथाऽक्षरमधिगम्यते सा परेति श्रुतेः”। ऋग्वेदादिलक्षणा अपरा सा च अध्ययनाध्यापनरूपा।

**विद्याचण(न)** त्रि० विद्यया ख्यातः। विद्या+चण(न) विद्यया विख्याते। [ख्याते।

**विद्याचुञ्चु** पु० विद्यया विख्यातः विद्या+चुञ्चु। विद्यया

**विद्यादल** पु० विद्यायै ज्ञानाय दल्यतेऽसौ। भूर्जवृक्षे शब्दच०

**विद्यादान** न० ६त०। १अध्यापने २पुस्तकादिदाने च। “विद्यादानञ्च अध्यापनेन व्याख्यया विलिख्यार्पणेन च भवतीति ज्यो०त०रघु०। तत्राध्यापनविधिः श्रुतौ यथा “योऽधीत्यार्थिभ्यो विद्यां न प्रयच्छेत् स काको वान्यस्मिन् स्यात् श्रेयसो द्वारमपावृणुयात् अनध्यापने दोषश्रवणात् तस्यावश्यकत्वं गम्यते। “अष्टवर्षं माणवकमुपनयीत तमध्यापयीत” इत्यादिश्रुतौ च अध्यापनाविधिलाभः। व्याख्यानादिविधिलाभस्तु “अज्ञानतिमिरोऽपेतान् कन्देहपटलान्वितान्। निरामयान् यः कुरुते शास्त्राञ्जनशलाकया। इह कीर्त्तिं राजपूजां लभते सद्गतिं च सः” ज्यो०त०। तद्धेतुपुस्तकादिदानञ्चाग्रे वक्ष्यमाणप्रमाणात् तत्र ज्ञानरूपविद्यादानप्रकारः हेमा०दा०वह्निपु०उक्तो यथा “वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम्। तत्फलं समवाप्नोति विद्यादानान्न संशयः। तस्माद्देवालये नित्यं धर्मशास्त्रस्य वा स्मृतेः। पठनं कारयेत् राजन्! यदीच्छेत् धर्ममात्मनः। गोभूहिरण्यवासांसि शयनान्यासनानि च। प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम!। धर्माधर्मौ न जानाति लोकोऽयं विद्यया विना। तस्मात् सदैव धर्मात्मन्! विद्यादानरतो भवेत्। वेदशास्त्ररहस्यज्ञो यदि नैव नृपोत्तम!। ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत्। ब्रह्मादयः सुराः सर्वे ऋषयो दग्धकिल्विषाः। मनुष्याः पितरश्चैव विद्यादाने प्रतिष्ठिताः। चतुर्युगानां राजेन्द्र! एकसप्ततिसंख्यया। वेदशास्त्रप्रदः स्वर्गे पूज्यते सुरसत्तमैः। इत्युपक्रमे “दानं विशेषफलदं जगतीह नान्यद् विद्यां विहाय वदनाम्बुजताधिवासाम्। गोभूहिरण्यगजवाजिरथादि सर्वं तां यच्छतां किमिति भूप! भवेन्न दत्तम्”। तत्रैव नन्दिपु० “अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः। एवं विद्याप्रदानं हि सर्वदानोत्तमोत्तमम्। सर्वदा सर्ववर्णानामयं च स्मृत उत्तमः। अनेन विधिना दत्त्वा विद्यां पुण्यपरो नरः”।

स्वयंविद्यादानासामर्थ्ये आ० त० भविष्यपु० उक्तं यथा “अध्यापकस्य यो वृत्तिं दत्त्वाऽध्यापयति द्विजान्। किं न दत्तं भवेत्तेन धर्मकामार्थमिच्छता”। तद्धेतुभूतपुस्तकादिदानमपि विद्यादानं हेमा० दा० उक्तं यथा नन्दिपु० “विद्या च सर्वा दानानां गुरुतोऽस्य विधिं बुधः। श्रुत्वा विद्याञ्च विधिवत् श्रद्धया भावितात्मना। सत्पात्रेभ्यश्च तां दद्यात् विशेषात् गुणशालिषु। उप-